സമഗ്ര ചോദ്യോത്തരങ്ങൾ

Chapter Name:विगतानुशयः। *Marks :(1)*

Quest:

**कोष्ठकात् समुचितमुत्तरं चित्वा लिखत ।**

१ डिम्भ! सिंह ! दन्तांस्ते गणयिष्यामि । कस्य वचनमिदम् ?

(दुष्यन्तस्य , सर्वदमनस्य , तापसस्य , शकुन्तलायाः )

२ दुष्यन्तस्य वंशः कः ?

(पुरुवंशः , भृगुवंशः , यादववंशः , इक्ष्वाकुवंशः )

३ दुष्यन्तस्य पुत्रः कः ?

(सर्वदमनः , अभिमन्युः , मेघनादः , लवः )

४ काव्येषु किं रम्यम् भवति ?

(गद्यम् , पद्यम् , नाटकम् , कथा )

५ उटजम् इत्यस्य अर्थः कः ?

( पुष्पम् , पर्णम् , आश्रमः , पर्वतः )

६ गात्रम् इति पदस्य अर्थः कः ?

(लोचनम् , शरीरम् , पात्रम् , कलत्रम् )

७ सर्वराजलक्षणसमेतं बालं दृष्ट्वा कः विस्मितः अभवत् ?

( सर्वदमनः , दुष्यन्तः , कण्वः , विक्रमः )

८ विगतानुशयः इति पाठभागः कस्मात् नाटकात् स्वीकृतः?

(मालविकाग्निमित्रात्, प्रतिमानाटकात्, अभिज्ञानशाकुन्तलात्, विक्रमोर्वशीयात्)

९ अभिज्ञानशाकुन्तलस्य कर्ता कः?

(भासः, कालिदासः, भवभूतिः , व्यासः)

१० अभिज्ञानशाकुन्तले कति अङ्काः विद्यन्ते?

(षट्, सप्त, दश, अष्ट)

११ दुष्यन्तः कस्मिन् वंशे जातः?

(पुरुवंशे, रघुवंशे, सोमवंशे, यादववंशे)

१२ शकुन्तलादुष्यन्तौ केन विधिना परिणीतौ?

(ब्राह्मविधिना, आर्षविधिना, गान्धर्वविधिना, आसुरविधिना)

१३ शकुन्तलादुष्यन्तौ कस्य शापेन वियुक्तौ अभवताम्?

( विश्वामित्रस्य, कण्वस्य, वसिष्ठस्य, दुर्वाससः)

१४ अभिज्ञानदर्शनेन शापमोक्षः भविष्यतीति महर्षिः अवदत्। महर्षिः कः?

( विश्वामित्रः, कण्वः, वसिष्ठः, दुर्वासाः)

१५ अभिज्ञानशाकुन्तलस्य कथाबीजं कस्मात् ग्रन्थाद् स्वीकृतः?

(रामायणात्, महाभारतात्, अग्निपुराणात्, वायुपुराणात्)

१६ विगतानुशय इति पाठ्यांशः शाकुन्तलस्य कस्मिन् अङ्के अन्तर्भवति?

(पञ्चमाङ्के, षष्ठे अङ्के, सप्तमाङ्के, अष्टमाङ्के)

१७ कौ प्रजापतेः आश्रमम् अगच्छताम्?

(माण्डव्यदुष्यन्तौ, शार्ङ्गरवशारद्वतौ, गौतमीशार्ङ्गरव मातलीदुष्यन्तौ)

१८ तापसस्य प्रजापतेः आश्रमं कुत्र वर्तते?

( हेमकूटे, चित्रकूटे, अगस्त्यकूटे, त्रिकूटे)

१९ हेमकूटस्य नामान्तरं किम्?

( किम्पुरुषपर्वतः, गन्धमादनपर्वते, सुमेरुपर्वतः, विन्ध्यपर्वतः)

२० अभिज्ञानशाकुन्तलस्य नाटकस्य मुख्यरसः कः?

( शृङ्गारः, हास्यः ,वीरः , करुणः)

२१ अभूमिरियम् अविनयस्य- कस्य वचनमिदम्?

( दुष्यन्तस्य, शार्ङ्गरवस्य, कण्वस्य, सर्वदमनस्य)

२२ सिंहशिशुं बलात्कारेण कः कर्षति?

( दुष्यन्तः, कण्वः,शार्ङ्गरवः, सर्वदमनः)

२३ दन्तांस्ते गणयिष्यामि । कस्य वचनमिदम् ?

(दुष्यन्तस्य , सर्वदमनस्य , तापसस्य , शकुन्तलायाः )

२४ महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे। अयं बालः कः?

(मार्कण्डेयः, चन्द्रकेतुः, सर्वदमनः, चित्रकेतुः)

२५ अथवा न न्यायः परदारव्यवहारः। कस्य वचनमिदम्?

(दुष्यन्तस्य , सर्वदमनस्य , तापसस्य , कण्वस्य )

२५.रक्षाकरण्डकम् अस्य मणिबन्धे न दृश्यते। कस्य?

(दुष्यन्तस्य , सर्वदमनस्य , तापसस्य , कण्वस्य )

२७ अपराजिता नामौषधिः कदा दत्ता?

(जातकर्मसमये, उपनयनसमये, नामकरणसमये, अन्नप्राशनसमये)

२८ अपराजिता नामौषधिः केन दत्ता?

(विश्वामित्रेण, कण्वेन, वसिष्ठेन, मारीचेन)

२९ सर्वदमनस्य जातकर्मसमये मारीचेन दत्ता औषधिः?

( विशल्यकरणिः, अपराजिता, बला, अतिबला)

३० एतां मातापितरौ आत्मानमपि वर्जयित्वा अपरो न गृह्णीयात्। किं न गृह्णीयात्?

(रक्षाकरण्डकम्, कर्णाभरणम्, नासाभरणम्, अङ्गुलीयकम्)

३१ मत्सरिणापि अनुकम्पितास्मि दैवेन।कस्याः वचनमिदम्?

(गौतम्याः, शकुन्तलायाः, अनसूयायाः, प्रियंवदायाः)

३२ उपहर इत्यस्य प्रयोगे प्रयुज्यमाना विभक्तिः का?

(तृतीया, चतुर्थी, षष्ठी, पञ्चमी)

३३ स्निह्यति इत्यस्य प्रयोगे प्रयुज्ञमाना विभक्तिः का?

(चतुर्थी, पञ्चमी, षष्ठी, सप्तमी)

३४ अलम् इत्यस्य प्रयोगे प्रयुज्यमाना विभक्तिः का?

(तृतीया, द्वितीया, पञ्चमी, षष्ठी )

३५ बाष्पं प्रमृज्य विगतानुशयो भवामि। अत्र विगतानुशयः कः?

( मातली, दुष्यन्तः, कण्वः, सर्वदमनः)

**३६ किं गणे न अन्तर्भवति?**

१) अभिज्ञानशाकुन्तलम् , रघुवंशम् , कुमारसंभवम् , नैषधीयचरितम्

२) सिंहः , करी , केसरी , मृगेन्द्रः

३) शृङ्गारः , करुणः ,कामः, शान्तः

४) उपगम्य , बालाय , विहाय , प्रविश्य

५) गौतमी , अनसूया , दमयन्ती , शकुन्तला

६) दुष्यन्तः , सर्वदमनः , कण्वः , मातली

७) दुष्यन्तः , विश्वामित्रः, कण्वः, शार्ङ्गरवः

**Hint:**

**उत्तराणि**

१ सर्वदमनस्य

२.पुरुवंशः

३ सर्वदमनः

४ नाटकम् .

५ आश्रमः

६ शरीरम्

७ दुष्यन्तः

८ अभिज्ञानशाकुन्तलात्

९ कालिदासः

१० सप्त

११ पुरुवंशे

१२ गान्धर्वविधिना

१३ दुर्वाससः

१४ दुर्वासाः

१५ महाभारतात्

१६ सप्तमाङ्के

१७ मातलीदुष्यन्तौ

१८ हेमकूटे

१९ किम्पुरुषपर्वतः

२० शृङ्गारः

२१ दुष्यन्तस्य

२२ सर्वदमनः

२३ सर्वदमनस्य

२४ सर्वदमनः

२५ दुष्यन्तस्य

२६ सर्वदमनस्य

२७ जातकर्मसमये

२८ मारीचेन

२९ अपराजिता

३० रक्षाकरण्डकम्

३१ शकुन्तलायाः

३२ चतुर्थी

३३ सप्तमी

३४ तृतीया

३५ दुष्यन्तः

३६-

१) नैषधीयचरितम्

२) करी

३) कामः

४) बालाय

५) दमयन्ती

६) मातली

७) दुष्यन्तः

**Chapter Name:विगतानुशयः।** *Marks :(1)*

**Quest:**

**मातृकानुसारं लिखत ।**

**उदा - बालोऽपि - बालः + अपि ।**

क) सिंहोऽयम् - --- + ---- ।

**उदा - शकुन्तला + इति - शकुन्तलेति ।**

खः का + इति - ----------

**उदा - खल्वयम् - खलु + अयम् ।**

ग) तेष्वन्यतमः - ------- + ----- ।

**Hint:**

**उत्तराणि**

क) सिंहः + अयम्

ख) केति

ग) तेषु + अन्यतमः

**Chapter Name:विगतानुशयः।** *Marks :(4)*

**Quest:**

**यथोचितं योजयत ।**

क) गात्रम् - आश्रमः

आत्मजः - सिंहः

केसरी - पुत्रः

उटजः -शरीरम्

ख) दुष्यन्तः - क्रीडनकं

शृङ्गारः - अबालसत्वः

सर्वदमनः - पुरुवंशः

मृत्तिकामयूरः - रसः

ग) विलोक्य - आवेगेन

औरसः - माता च पिता च

अलम् - ल्यबन्तं

पितरौ - उरसा जातः

Hint:

**उत्तराणि**

क) गात्रम् - शरीरम्

आत्मजः - पुत्रः

केसरी - सिंहः

उटजः - आश्रमः

ख) दुष्यन्तः - पुरुवंशः

शृङ्गारः - रसः

सर्वदमनः - अबालसत्वः

मृत्तिकामयूरः - क्रीडनकं

ग) विलोक्य - ल्यबन्तं

औरसः - उरसा जातः

अलम् - आवेगेन

पितरौ - माता च पिता च

**Chapter Name:विगतानुशयः।** *Marks :(1)*

**Quest:**

**क) वाक्यं पठित्वा सम्बोधनरूपं क्रियारूपं च चित्वा लिखत ।**

सर्वदमन ! शकुन्तलावण्यं पश्य ।

**ख) सम्बोधनरूपाणि चित्वा लिखत ।**

१) डिंभ ! सिंह ! दन्तांस्ते गणयिष्यामि ।

२) अविनीत ! किं नः अपत्यनिर्विशेषाणि सत्वानि विप्रकरोषि ?

३) भद्रमुख ! न खल्वयम् ऋषिकुमारः ।

**Hint:**

**उत्तराणि**

**क)**

**सम्बोधनरूपम् -** सर्वदमन!

**क्रियारूपं -** पश्य ।

**ख)**

१) डिंभ ! सिंह !

२) अविनीत !

३) भद्रमुख !

Chapter Name:विगतानुशयः।　　　　　　*Marks :(3)*

**Quest:**

**वाक्यं पठित्वा क्त्वान्त-तुमुन्नन्त-ल्यबन्तानि अव्ययानि विविच्य लिखत ।**

पुरुवंशराजः दुष्यन्तः आकाशमार्गेण आगत्य हेमकूटनामके पर्वते सर्वदमनं दृष्ट्वा विस्मितः सन् तस्मिन् स्नेहं प्रकटयितुम् आरब्धवान् ।

**Hint:**

| उत्तराणि- | **क्त्वान्त-** | **तुमुन्नन्त-** | **ल्यबन्तानि** |
|---|---|---|---|
| | दृष्ट्वा | प्रकटयितुम् | आगत्य |

Chapter Name:विगतानुशयः।　　　　　　*Marks :(5)*

**Quest:**

**सूचनाः उपयुज्य लघूपन्यासं लिखत ।**

सूचना- संस्कृतसाहित्यम् - दृश्यश्रव्यकाव्यानि - नाटकं - दशरूपकेष्वेकः रङ्गावतरणम् - चतुर्विधाभिनयः - कानिचनसंस्कृतनाटकानि ।

**Hint:**

**<u>नाटकम्</u>**

अतिविपुलं महत्तरं च भवति संस्कृत साहित्यम्। तत्दृश्य श्रव्य भेदेन द्विविधं

भवति ।तत्र दृश्य विभागे दशरूपाकाणि अन्तर्भवन्ति। दशरूपकेषु एकं भवति नाटकम् । काव्येषु नाटकं रम्यं इति प्रथापि प्रसिद्धमेव। कालिदासेन विरचितं अभिज्ञानशाकुन्तलं नाटकं, भासस्य नाटकक्राणि च अति प्रसिद्धानि भवन्ति।

**मूल्यनिर्णयसूचिका-**

वाक्यघटना- 1 आशयव्यक्तता - 2 भाषाशुद्धिः -2

**Chapter Name:विगतानुशयः।** *Marks :(5)*

**Quest:**

**क) सूचनाः उपयुज्य दुष्यन्तस्य स्वभावं निरूपयत ।**

A) कालिदासः - अभिज्ञानशाकुन्तलम् - नायकः - प्रजापतेः आश्रमप्रवेशः - सर्वदमनचापल्येषु वात्सल्यम् - शकुन्तलां प्रति स्वापराधकथनम् - विगतानुशयः ।

B) पुरुवंशराजः - धीरोदात्तः-शकुन्तलां परिणीतः - शापेन-परित्यक्तः प्रजापतेः आश्रमे अबालसत्वं बालं पश्यति -पुत्रवत्सलः अयम् -

रक्षाकरण्डकस्य ग्रहणम् - पुनस्समागमः ।

**ख) सूचनानुसारं शकुन्तलायाः स्वभावं निरूपयत ।**

अभिज्ञानशाकुन्तले नायिका - कण्वमहर्षेः पालितपुत्री - सहजीविस्नेहं - दुष्यन्तं गान्धर्वविधिना परिणीतवती - शापेन परित्यक्ता - काश्यपाश्रमे -

सर्वदमनं प्रतिवात्सल्यम् - पतिस्नेहं - पुनः समागमः ।

Hint:

**क) सूचनाः उपयुज्य दुष्यन्तस्य स्वभावं निरूपयत ।**

**<u>दुष्यन्तः</u>**

A) कविकुलगुरुः कालिदासेन विरचितं भवति विश्वप्रसिद्धम् अभिज्ञानशाकुन्तलं नाटकम्। -अस्मिनन् नाटके नायकःभवति दुष्यन्तः। नाट्यलक्षणेषु उक्तं सर्वाणि गुणानि अस्मिन् कथापात्रे दृश्यते। नाटकस्य अन्ते यदा प्रजापतेः आश्रमप्रवेशःप्रविशति तदा सर्वदमनचापल्येषु कौतुकं पुत्रवात्सल्यं च द्रष्टुं शक्यते । सः शकुन्तलां प्रति स्वापराधकथनसमये अहं विगतानुशयो भवामि- इत्युक्त्वा शकुन्तलां समाश्वस्य अनुनयति । एवं उत्तमनायकरूपेण महाकविः तं वर्णयति ।

**<u>दुष्यन्तः</u>**

B) कविकुलगुरुः कालिदासेन विरचितं भवति विश्वप्रसिद्धम् अभिज्ञानशाकुन्तलं नाटकम्। -अस्मिनन् नाटके नायकःभवति पुरुवंशराजा दुष्यन्तः। नाट्यलक्षणेषु उक्तं धीरोदात्तः नायक गुणानि अस्मिन् कथापात्रे दृश्यते । नाटके सः शकुन्तलां परिणीयति मुनिशापेन वियुक्तौ च अभवताम् । नाटकस्य अन्ते यदा प्रजापतेः आश्रमं प्रविशति तदा सः अबालसत्वं बालं पश्यति । तस्मिन् समये तस्य पुत्रवत्सलस्यं द्रष्टुं शक्यते । सः शकुन्तलां प्रति स्वापराधकथनेन शकुन्तलां समाश्वस्य अनुनयति । एवं उत्तमनायकरूपेण महाकविः तं वर्णयति ।

**ख)**

**<u>शकुन्तला</u>**

कविकुलगुरुः कालिदासेन विरचितं भवति विश्वप्रसिद्धम् अभिज्ञानशाकुन्तलं

नाटकम्। अस्मिन् नाटके नायिका भवति कण्वमहर्षेः पालितपुत्री शकुन्तला । सहजीविस्नेहयुक्तः सा दुष्यन्तं गान्धर्वविधिना परिणीतवती अनन्तरं मुनिशापेन शापेन परित्यक्ता च अभवत् । नाटके काश्यपाश्रमे आश्रमे सा एकं पुत्रं असूता। तस्याः सर्वदमनं प्रतिवात्सल्यम् नाटके अतीवहृद्यमेव । नाटकस्य अन्ते यदा दुष्यन्तः स्वापराधकथयति तदा तस्याः पतिस्नेहं सहनशक्तिः च द्रष्टुं शक्यते। एवं अतीवमनोहारितया कालिदासेन शकुन्तलाम् अस्मिन् नाटके अवतार्यति।

**मूल्यनिर्णयसूचिका-**

वाक्यघटना- 1 आशयव्यक्तता - 2 भाषाशुद्धिः -2

**Chapter Name:विगतानुशयः।** *Marks :(5)*

**Quest:**

**अधोदत्तं संभाषणांशं पठित्वा सूचनाः उपयुज्य च सर्मवदमनमधिकृत्य लघूपन्यासं लिखत ।**

डिंभ ! सिंह ! दन्तांस्ते गणयिष्यामि ।

सूचना- नाटकं - अभिज्ञानशाकुन्तलं - आश्रमजीवितम् - वीर्यवान् बालः - सर्वदमनः- सिंहशिशुना सह क्रीडा -अबालसत्वः ।

**Hint:**

**<u>सर्वदमनः</u>**

कविकुलगुरुः कालिदासेन विरचितं भवति विश्वप्रसिद्धम् अभिज्ञानशाकुन्तलं नाटकम्। अस्मिनन् नाटके शकुन्तला दुष्यन्तयोः पुत्रत्वेन सर्वदमनः अवतारयति। नाटके काश्यपाश्रमे सः जनिमलभत । नाटकस्य अन्ते यदा दुष्यन्तः प्रजापतेः आश्रमं प्रविशति तदा सर्वदमनः सिंहशिशुना साकं क्रीडति तद्वारा तस्य निर्भयत्वं द्रष्टुं शक्यते।

तस्य राजर्षिलक्षणं आबालसत्वः इत्यादि प्रतिपादनेन अस्य गुणान् अवगम्यते । अस्य मातृवास्तल्यं क्रीडनीयकदर्शनेन एवं पितृभक्तिः दुष्यन्तस्य नामकथने च अवगम्यते । एवं कालिदासः अतीवमनोहारितया सर्वदमनं अस्मिन् नाटके वर्ण्यति।

**मूल्यनिर्णयसूचिका-**

वाक्यघटना- 1 आशयव्यक्तता - 2 भाषाशुद्धिः -2

**Chapter Name:विगतानुशयः।** *Marks :(5)*

**Quest:**

**प्रादेशिकभाषया अनुवदत ।**

**क)** विश्वप्रसिद्धः महाकविः भवति कालिदासः । तेन त्रीणि नाटकानि , द्वे महाकाव्ये च विरचितानि । मेघदूतं नाम सन्देशकाव्यं च तेन विरचितं भवति । "उपमा कालिदासस्य" "काव्येषु नाटकं रम्यं तत्र शाकुन्तलं मतम् " इत्याद्याः उक्तयः सुप्रसिद्धाः एव । अभिज्ञानशाकुन्तले पुरुवंशराजस्य दुष्यन्तस्य शकुन्तलायाः च कथा वर्ण्यते । नाटकस्य इतिवृत्तं महाभारतात् स्वीकृतं भवति ।

**ख)** जातककथाः बौद्धधर्मेण सम्बद्धाः । गौतमबुद्धस्य जन्मान्तरानुभवाः विद्यन्ते तासु । मनुजपक्षिमृगादीनां कथाः अत्र वर्ण्यन्ते । अस्यां

कथायां जीवनस्य नश्वरतां तथा मूल्ययुक्तस्य सदाचारजीवनस्य प्रसक्तिम् आविष्कुर्वन्ति च ।

**Hint:**

**मूल्यनिर्णयसूचिका-**

क)-ख)वाक्यघटना- 1 आशयव्यक्तता - 2 भाषाशुद्धिः -2